# Brahmakrita Shri Kumbheshvara Stutih

# બ્રહ્મકૃતા શ્રીકુમ્ભેશ્વરસ્તુતિઃ

## Document Information

Text title : Kumbheshwara Stutih

File name : kumbheshvarastutiHbrahmakRRitA.itx

Category : shiva, stuti

Location : doc_shiva

Transliterated by : Brahmashri Balaji Dvivedi

Proofread by : Balaji Dvivedi

Description/comments : From Tamil text Kumbhakonam Mahatmyam

Latest update : March 31, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 30, 2026

*sanskritdocuments.org*

# બ્રહ્મકૃતા શ્રીકુમ્ભેશ્વરસ્તુતિઃ

બ્રહ્મોવાચ ।
નમો નમઃ કારણકારણાય
શ્રીમત્સુધાકુમ્ભગવિગ્રહાય ।
કલ્યાણસાન્દ્રાય ગુણાકરાય
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૧॥

ભીમાય ભીમાધિહરાય શમ્ભવે
નાગાય શાન્તાય મનોહરાય ।
મહાજટાજૂટધરાય ભૂતયે
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૨॥

સર્વાગમામ્નાય શરીરધારિણે
સોમાર્કનેત્રાય મહેશ્વરાય ।
યજ્ઞાય યજ્ઞેશ્વરપૂજિતાય
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૩॥

કાત્યાયનીકામિતદાયકાય
દુર્ગાર્ધદેહાય કૃતાગમાય ।
કાલાય કાલેશ્વરપૂજિતાય
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૪॥

વિભૂતિદાનેકશરીરધારિણે
કલ્પાય કલ્પાન્તકરાય શમ્ભવે ।
વિશ્વાય વૈશ્વાનરલોચનાય
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૫॥

માયાપ્રપઞ્ચાય મનોહરાય
માયાઘટેશાય મહાઽઽધિહારિણે ।
માયાપ્રપઞ્ચૈકનિદાનમૂર્તયે

શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૬॥

ભોગીન્દ્રસમ્પૂજિતવિગ્રહાય
ભોગીન્દ્રભૂષાય ભવાન્તકાય ।
શ્રીભારતીશકરપલ્લવપૂજિતાય
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૭॥

તામ્રાય ચામીકરભૂષિતાય
શ્રીસોમકોટીરવિભૂષિતાય ।
સમસ્તસત્ક્ષેત્રતલાવરાય
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૮॥

સૃષ્ટિસ્થિતિધ્વંસનકારણાય
શ્રીસૃષ્ટિબીજાઙ્ગમનોહરાય ।
સચ્છાસ્ત્રવેદાન્તકળેબરાય
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૯॥

ષડ્વર્ગસમ્ભેદનદીક્ષિતાય
ષડાનનાદિત્યફલપ્રદાય ।
સમસ્તમન્ત્રાર્થનિદાનરૂપિણે
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૧૦॥

કુમ્ભોદ્ભવપ્રમુખપૂજિતવિગ્રહાય
વીરાય વીરાન્તકરાય માયિને ।
ભક્તેષ્ટદાનનિપુણાય ભવાબ્ધિપોત્રે
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૧૧॥

મૂલાય મૂલાગમપૂજિતાય
પાતાળમૂલાય નિધીશ્વરાય ।
નિત્યાય સિદ્ધેશ્વરપૂજિતાય
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૧૨॥

સમસ્તકલ્યાણવરપ્રદાય
સમસ્તકલ્યાણનિદાનમૂર્તયે ।
શ્રીમઙ્ગળામ્બાઽર્ચિતપાદપદ્મિને
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૧૩॥

લગ્નાધિપેશાય ગ્રહાર્ચિતાય
શ્રીકામધેનુસુરસઙ્ઘસુપૂજિતાય ।
પઞ્ચાનનાય પરમાર્થનિદર્શકાય
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૧૪॥

તીર્થાધિનાથાય ફલપ્રદાય
ફલસ્વરૂપાય ફલાઙ્ગધારિણે ।
શ્રીમન્ત્રપીઠેશ્વરિવલ્લભાય
શ્રીકુમ્ભલિઙ્ગાય નમશ્શિવાય ॥ ૧૫॥

કારુણ્યનિધયે તુભ્યં કલ્યાણગુણસિન્ધવે ।
શૂલિને માલિને તુભ્યં નમસ્તે વિશ્વમૂર્તયે ॥ ૧૬॥

અઘોરાય નમસ્તુભ્યં વામદેવાય તે નમઃ ।
સદ્યોજાતાય નીલાય લોહિતાક્ષાય તે નમઃ ॥ ૧૭॥

ચણ્ડખણ્ડાય શાન્તાય કાલકાલાન્તકાય ચ ।
રુદ્રાય નીલકણ્ઠાય નમો મૃત્યુઞ્જયાય ચ ॥ ૧૮॥

શિપિવિષ્ટાય કાલાય કાલદણ્ડાય તે નમઃ ।
શ્રીમતે વેદનિધયે વેદવેદ્યાય તે નમઃ ॥ ૧૯॥

વૈદ્યાય વસુનાથાય વરિષ્ઠાય નમોનમઃ ।
શર્વાય શાખિને તુભ્યં મદનાઙ્ગવિભેદિને ॥ ૨૦॥

ચન્દ્રચૂડાય ચણ્ડાય નમસ્તે ખણ્ડિતારયે ।
હરિકેશાય દેવાય પુષ્ટાનાં પતયે નમઃ ॥ ૨૧॥

પશૂનાં પતયે તુભ્યં વૃષભાક્ષાય તે નમઃ ।
વૃષવાહાય વિષવે પુણ્યકાલાય તે નમઃ ।
કાર્યકારણરૂપાય ભેદભેદ્યાય તે નમઃ ॥ ૨૨॥

પુરતઃ પૃષ્ઠતશ્ચૈવ પાર્શ્વતસ્તે નમોનમઃ ।
ભૂયો ભૂયો નમસ્તુભ્યં ભૂયો ભૂયો નમોનમઃ ॥ ૨૩॥

ઇતિ બ્રહ્મકૃતા શ્રીકુમ્ભેશ્વરસ્તુતિઃ સમ્પૂર્ણા ।

Encoded from Tamil and proofread by Brahmashri Balaji Dvivedi

*Brahmakrita Shri Kumbheshvara Stutih*

pdf was typeset on March 30, 2026

Please send corrections to *sanskrit@cheerful.com*